# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** | **प्रश्नपत्रम् – 5** | गुणाः –70

विषयः – धर्मशास्त्रम् | **कोड –C.C.3.6.11** | समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –03/04/2019 | सन्दर्भग्रन्थः – विदुरनीतिः (1 - 8 अध्यायाः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 अधोलिखितेषु द्वयोः ससन्दर्भान्वयप्रसङ्गपूर्वकं भावार्थो लेख्यः। 10**

(1) एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः॥

(2) भक्तं च यजमानं च तया स्मीति च वादिनम्।
त्रीनेतांश्छरणं प्राप्तान्विषमेऽपि न संत्यजेत्॥

(3) वाक्संयमो हि नृपते सुदुष्करतमो मतः।
अर्थवच्च विचित्रं च न शक्यं बहुभाषितुम्॥

**प्रश्नः-2 कस्याप्येकस्य सविस्तरमुत्तरं लिखत। 10**

(1) पण्डितलक्षणानि सम्यक्तया विवेचयन्तु।

(2) मूर्खमतिलक्षणानि साधुतया वर्णयन्तु।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 अधोलिखितेषु द्वयोः श्लोकयोः ससन्दर्भपूर्वकं भावार्थो लेख्यः। 10**

(1) यावत्कीर्तिर्मनुष्यस्य पुण्या लोके प्रगीयते।
तावत्सपुरुव्याघ्र स्वर्गलोके महीयते॥

(2) यतो यतो निवर्तते ततस्ततो विमुच्यते।
निवर्तनाद्धि सर्वत्र न वेत्ति दुःखमण्वपि॥

(3) द्युतमेतत्पुराकल्पे दृष्टं वैरकरं नृणाम्।
तस्मात् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्।

**प्रश्नः-4 कस्याप्येकस्य सविस्तरमुत्तरं लिखत। 10**

(1) उत्तम-मध्यमाधमपुरुषलक्षणानि वर्णयन्तु।

(2) यमदूताः कान् कान् नरकं नयन्ति? एतद्विषये विवेचनं क्रियताम्।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गान्वयपूर्वकं भावार्थो लेख्यः।** **10**

(1) यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता।
मज्जन्ति तेऽवशा राजन् नद्यामश्मप्लवा इव॥

(2) न स्वप्नेन जयेन्निद्रां न कामेन जयेत्स्त्रियः।
नेन्धनेन जयेदग्निं न पापेन सुरां जयेत्॥

(3) कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम्।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि सन्तर॥

**प्रश्नः-6 एकस्य सविस्तरमुत्तरं यच्छत।** **10**

(1) राजगुणविषये सम्यक्तया विवेचयत।

(2) मित्रतालक्षणानि सविस्तरं प्रतिपादयन्तु।

### अन्वितयः १-३

**प्रश्नः-7 दशप्रश्नानामेकद्विवाक्येनोत्तराणि लिखन्तु।** **10**

(1) का परमा तृप्तिरूपा अस्ति?

(2) नरकस्य द्वारं किमस्ति?

(3) के नित्यदुःखिता सन्ति?

(4) केन मिष्टाशा जिता अस्ति?

(5) सर्वार्थाः कस्य सिद्ध्यन्ति?

(6) धर्मस्य अष्टविधत्वं किमस्ति?

(7) शान्तिमार्गः कः अस्ति?

(8) जरा किं हरति?

(9) के पुरुषाः सुलभाः सन्ति?

(10) के नावज्ञेयाः सन्ति?

(11) लक्ष्मीवर्धिकाः गुणाः के सन्ति?

(12) के तारयन्ति? के मज्जयन्ति?

(13) ऐस्वर्यकारणं किमस्ति?

(14) कुत्र विश्वासो न करणीयः?

(15) कस्य जीवनं सफलं वर्तते?